# Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૧ સ્નાનકર્મશિવમન્ત્રોપદેશમ્

## Document Information

Text title : Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham

File name : shivapUjAsAdhanAni1snAnakarmashivamantropadesham.itx

Category : shiva, shivarahasya, mantra, pUjA, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 140-153.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૧ સ્નાનકર્મશિવમન્ત્રોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
મન્ત્રરેતૈઃ સ્નાનકર્મ શિવાય વિનિવેદયેત્ ।
ચૈત્રસ્નાનેન ભગવાન્ મહારુદ્રો વિરાટ્પતિઃ ॥ ૧૪૦॥

પ્રીણાતુ પાર્વતીનાથશ્ચિત્રસૃષ્ટિવિશારદઃ ।
વૈશાખમાસસ્નાનેન ભગવાન્ગિરિજાપતિઃ ॥ ૧૪૧॥

પ્રીણાતુ શ્રીમહાદેવો વિષ્ણુબ્રહ્માદિવન્દિતઃ ।
જ્યેષ્ઠસ્નાનેન ભગવાન્દેવશ્રેષ્ઠો મહેશ્વરઃ ॥ ૧૪૨॥

પ્રીણાતુ શઙ્કરીયુક્તો નાનાગણનિષેવિતઃ ।
અષાઢમાસસ્નાનેન ભગવાન્ગિરિજાપતિઃ ॥ ૧૪૩॥

પ્રીણાતુ સર્વભૂતાત્મા સદ્યો દાક્ષાયણીયુતઃ ।
નભઃસ્નાનેન ભગવાન્ભગનેત્રભિદીશ્વરઃ ॥ ૧૪૪॥

પ્રીણાત્વાર્યાયુતો દેવો દેવવર્યઃ સનાતનઃ ।
નભસ્યમાસસ્નાનેન ભગવાન્વિશ્વલોચનઃ ॥ ૧૪૫॥

પ્રીણાતુઃ સોમઃ સોમાત્મા વિભુર્હૈમવતીયુતઃ ।
આશ્વીજમાસસ્નાનેન ભગવાન્વિશ્વહૃદ્ગતઃ ॥ ૧૪૬॥

પ્રીણાતુ ત્રિપુરારાતિરીશાનીપ્રાણનાયકઃ ।
ભગવાન્ કાર્તિકસ્નાનાત્ સોમસૂર્યાગ્નિલોચનઃ ॥ ૧૪૭॥

પ્રીણાતુ દુર્ગાસંયુક્તો દુર્ગપાતકનાશનઃ ।
માર્ગશીર્ષસ્ય માસીય (માસસ્ય) સ્નાનેન ભગવાન્ભવઃ ॥ ૧૪૮॥

પ્રીણાતુ સચ્ચિદાનન્દો ભવાનીપ્રાણનાયકઃ ।
પુષ્યસ્નાનેન ભગવાન્પુષ્ટિદઃ પુરુષોત્તમઃ ॥ ૧૪૯॥

પ્રીણાતુ મન્મથારાતિરમ્બિકાપ્રાણવલ્લભઃ ।
માઘસ્નાનેન ભગવાનુમાકાન્તો જગત્પિતા ॥ ૧૫૦॥

પ્રીણાતુ શિવયા યુક્તઃ સર્વમઙ્ગલસંશ્રયઃ ।
ભગવાન્ફાલ્ગુનસ્નાનાન્નીલકણ્ઠો જગત્પતિઃ ॥ ૧૫૧॥

પ્રીણાતુ મઙ્ગલાયુક્તઃ સર્વમઙ્ગલદાયકઃ ।
મન્ત્રામૈવં સમુચ્ચાર્ય પ્રતિમાસં પ્રયત્નતઃ ॥ ૧૫૨॥

સ્નાનં યઃ કુરુતે નિત્યં સ સ્નાનફલભાગ્ભવેત્ । ૧૫૩.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૧ - સ્નાનકર્મશિવમન્ત્રોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૧૪૦-૧૫૩.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 140-153.1..

Notes:
Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Dvija દ્વિજ) about Śiva Nāma Mantra-s શિવનામમન્ત્ર pertaining to Snānakarma સ્નાનકર્મ for each month - starting from Caitra ચૈત્ર.
The Adhyāyaḥ 26 અધ્યાયઃ ૨૬ has several other details about Śivapūjāsādhanāni શિવપૂજાસાધનાનિ.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivapujasadhanani 1 Snanakarmashivamantropadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*